# एकविंशः पाठः

## शिशुगीतम् - ଶିଶୁ ଗୀତ

## भारतभक्ताः

वयं बालकाः भारतभक्ताः
वयं बालिकाः भारतभक्ताः
वयं हि सर्वे भारतभक्ताः
भुवनत्रयं विजेतुं शक्ताः.... । वयम्...

वयं सुधीराः वयं सुवीराः
हृष्टमानसाः पुष्टशरीराः
सम्यक् पठामः सम्यक् लिखामः
लोकसेवायां युक्ताः भवामः.... । वयम्

जातिधर्ममतभेदं त्यक्त्वा
भारतवर्षं पूज्यं मत्वा
ऐक्यभावं हृदये धृत्वा
देशसेवायामनुरक्ताः..... । वयम् ।

**शब्दार्थाः**

भारतभक्ताः - ଭାରତ ଭକ୍ତ, हि - ଯେଣୁ, सर्वे - ସମସ୍ତେ, भुवनत्रयं - ତିନିଭୁବନକୁ (ସ୍ୱର୍ଗ ମର୍ତ୍ତ୍ୟ ପାତାଳ) जेतुं - ଜୟ କରିବାକୁ, सुधीराः - ଅତ୍ୟନ୍ତ ଧୀର, सुवीराः - ଅତ୍ୟନ୍ତ ବୀର, हृष्टमानसाः - ଆନନ୍ଦମନା, पुष्टशरीराः - ସୁସ୍ଥ ଶରୀର, सम्यक् - ଭଲ, त्यक्त्वा - ତ୍ୟାଗକରି, मत्वा - ମନେ କରି, धृत्वा - ଧରି, देशसेवायाम् - ଦେଶ ସେବାରେ, ଅନୁରକ୍ତାଃ - ଆଗ୍ରହୀ ।

## अभ्यासः (ଅଭ୍ୟାସ)

### १. शून्यस्थानं पूरयतु। (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

(क) वयं हि ________ भारतभक्ताः।(सर्वः, सर्वे)

(ख) ________ विजेतुं शक्ताः। (भुवनत्रयं, भुवनद्वयम्)

(ग) ________ सुवीराः। (अहम्, वयम्)

(घ) ________ पठामः।(सम्यक्, शरीराः)

(ङ) ________ पूज्यं मत्वा। (भारतवर्षम्, हृदये)

### २. स्तम्भमेलनं करोतु। (ସ୍ତମ୍ଭମେଳନ କର)

| (क) | (ख) |
|---|---|
| वयं | लिखामः |
| सम्यक् | बालकाः |
| लोकसेवायां | हृदये |
| ऐक्यभावं | युक्ताः |

### ३. वाक्यानि रचयतु। (ବାକ୍ୟ ରଚନା କର)

वयम्, सर्वे, पठामः, लिखामः, भवामः

### ४. मातृभाषया अर्थं लिखतु। (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

हि, भुवनत्रयम्, पुष्टशरीराः, सम्यक्, धृत्वा

### ५. संस्कृतेन लिखतु। (ସଂସ୍କୃତରେ ଲେଖ)

ତ୍ୟାଗକରି, ସମସ୍ତେ, ଜୟକରିବାକୁ, ଆନନ୍ଦମନା, ଦେଶସେବାରେ ।

# प्रहेलिका (उत्तरं वदतु)

कस्तुरी जायते कस्मात् ?
को हन्ति करिणां कुलम् ?
किं कुर्यात् कातरो युद्धे ?
मृगात् सिंहः पलायते ।।१।।

वृक्षाग्रवासी न च पक्षिराजः
त्रिनेत्रधारी न च शूलपाणिः ।
त्वग्वस्त्रधारी न च सिद्धयोगी
जलं च बिभ्रन्नघटो न मेघः ।।२।।

कं संजघान कृष्णः (कंसम्)
का शीतलवाहिनी गङ्गा ।(काशी)
के दारपोषणरताः (केदार)
कं बलवन्तं न बाधते शीतम् ।।३।। (कम्बल)

अपदो दूरगामी च साक्षरो न च पण्डितः ।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः ॥४।।

न तस्यादिर्न तस्यान्तः मध्ये यस्तस्य तिष्ठति ।
तवाप्यस्ति ममाप्यस्ति यदि जानासि तद् वद ॥५।।

**ଶବ୍ଦାର୍ଥ :-**

**जायते - ଜାତ ହୁଏ, हन्ति - ହତ୍ୟାକରେ, करिणाम् - ହାତୀମାନଙ୍କର कातरः - ଭୀରୁ, शूलपाणिः- ଶିବ, त्वक् - ଚମଡ଼ା, बिभ्रन् - ଧାରଣ କରୁଥିବା, जघान - ମାରିଥିଲେ, पोषणरताः - ପୋଷଣକାରୀ, स्फुटवक्ता - ଯଥାର୍ଥବକ୍ତା ।**

୧- ପ୍ରଥମ ତିନିଧାଡ଼ିର ଉତ୍ତର ୪ର୍ଥ ଧାଡ଼ିରେ ଅଛି । ୨- ନାରିକେଳ । ୩- ପ୍ରଶ୍ନରେ ଉତ୍ତର ରହିଛି - କଂସଂ, କାଶୀତଳବାହିନୀ, କେଦାର ପୋଷଣରତାଃ, କଂବଳବନ୍ତମ୍ । ୪- ପତ୍ର (ଚିଠି) । ୫- ନୟନ

## अभ्यासः (ଅଭ୍ୟାସ)

**१. संस्कृतेनं उत्तरं लिखतु। (ସଂସ୍କୃତରେ ଉତ୍ତର ଲେଖ)**

(क) कस्तुरी कस्मात् जायते ?

(ख) करिणां कुलं कः हन्ति ?

(ग) कातरः युद्धे किं करोति ?

(घ) कृष्णः कं संजघान ?

(ङ) कं बलवन्तं न बाधते शीतम् ?

(कम्बलवन्तभ्, पलायते, मृगात्, सिंहः, कंसम्)

**२. शून्यस्थान पूरयतु। (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)**

(क) वृक्षाग्रवासी न च ________ ।

(ख) ________ न च शूलपाणिः।

(ग) कं संजघान ________ ।

(घ) ________ स्फुटवक्ता।

(ङ) साक्षरो न च________ ।

(पण्डितः, पक्षिराजः, कृष्णः, त्रिनेत्रधारी, अमुखः)

**३. मातृभाषया अर्थं लिखतु। (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)**

(क) कं संजघान कृष्णः ?

(ख) कंसं जघान कृष्णः।

(ग) का शीतलवाहिनी गङ्गा ?

(घ) काशीतलवाहिनी गङ्गा।

(ङ) के दारपोषणरताः ?

(च) केदारपोषणरताः।

(छ) कं बलवन्तं न बाधते शीतम् ?

(ज) कंबलवन्तं न बाधते शीतम् ?

# के च ते ?



**वानरः**

पश्यत वानरराजं दक्षम्
कूर्दति वृक्षादन्यं वृक्षम् ।



**कुक्कुरः**

दृष्ट्वा रात्रौ एकं चौरम्
भषति कुक्कुरो वारं वारम् ।

**मार्जारी**

माजारीयं खादति मीनम्
पिबति च दुग्धं तिष्ठति मौनम् ।





**मधुपः**

मधुपोऽयं विहरति सानन्दम् ।
पायं पायं मधुमकरन्दम् ।।



**हस्ती**

हस्ती गच्छति मन्दसुमन्दम् ।
जनयति चासौ नयनानन्दम् ।।



**शशकः**

शशकः सततं कुरुते क्रीडाम्
ततः परमनुभवति पीडाम् ।

शब्दार्था :-

दक्षम् - ସମର୍ଥ, कूर्दति - ଡେଉଁଛି, दृष्ट्वा - ଦେଖି, रात्रौ - ରାତିରେ भषति - ଭୁକୁଛି, मार्जारीयं - (मार्जारी + इयम्) ଏହି ମାଈ ବିଲେଇ, मीनम् - ମାଛକୁ, च - ଓ, मौनम् - ନୀରବ, मधुपः - ଭ୍ରମର, मधुपः + अयं (मधुपोऽयं) ଏହି ଭ୍ରମର, विहरति - ବୁଲୁଛି, पायं पायं - ପିଇ ପିଇ, मकरन्दम् - ଫୁଲରସ, मन्दम् - ଧୀରେ, असौ - ସେ, शशकः- ଠେକୁଆ, सततम् - ସବୁବେଳେ, ततः - ତା'ପରେ, पीडाम् - କଷ୍ଟ।

श्लोकार्था:

१- यूयं दक्षं वानरराजं पश्यत। असौ वृक्षात् अन्यं वृक्षं कूर्दति।

२- रात्रौ एकं चौरं दृष्ट्वा कुक्कुरः वारं वारं भषति।

३- इयं मार्जारी मीनं खादति। दुग्धं पिबति। मौनं च तिष्ठति।

४- अयं मधुपः मधुमकरन्दं पायं पायं सानन्दं विहरति।

५- हस्ती मन्दसुमन्दं गच्छति। नयनानन्दं च असौ जनयति।

६- शशकः सततं क्रीडां कुरुते। ततः परं पीडाम् अनुभवति।

## अभ्यासः (ଅଭ୍ୟାସ)

### १. शून्यस्थानं पूरयतु (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣକର ।)

(क) शशकः सततं ________ कुरुते। (क्रीडाम्, क्रीडा)

(ख) मन्दं मन्दं हस्ती ________। (गच्छति, गच्छन्ति)

(ग) मधुपः ________ विहरति। (अयम्, इयम्)

(घ) ________मार्जारी मीनं खादति। (अयम्, इयम्)

(ङ) असौ नयनानन्दं ________। (जनयति, जनयन्ति)

२. मातृभाषया अर्थं लिखतु (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

मधुपः, शशकः, पिबति, भषति, कूर्दति

३. संस्कृतेन लिखतु (ସଂସ୍କୃତରେ ଲେଖ)

ଅନୁଭବ କରେ, ବିହାର କରେ, ଦେଖୁ, ଜନ୍ମାଏ, ପୀଡ଼ା

४. स्तम्भमेलनं करोतु (ସ୍ତମ୍ଭ ମିଳାଅ)

| (क) | (ख) |
|---|---|
| अयं | विहरति |
| सानन्दं | भषति |
| मौनं | पश्यत |
| वारंवारं | मधुपः |
| वानरराजं | तिष्ठति |

●●●

# सुभाषितानि

माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ।।१।।

अर्थः- या माता बालं न पाठयति सा - माता शत्रुः भवति । यः पिता न पाठयति । सः पिता वैरी भवति । हंसमध्ये वकः यथा न शोभते तथा अयं मूर्खः बालः सभामध्ये न शोभते ।

पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम् ।
मौनिनः कलहः नास्ति न भयं चास्ति जाग्रतः ।।२।।

अर्थः- पठतः जनस्य मूर्खत्वं नास्ति । जपतः लोकस्य पातकं नास्ति । मौनिजनस्य कलहः नास्ति । जाग्रतः जनस्य भयं नास्ति ।

विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वाद् धनम् आप्नोति धनाद्धर्मः ततः सुखम् ।।३।।

अर्थः- विद्या विनयं ददाति । विनयात् पात्रतां याति ।
पात्रत्वात् धनम् आप्नोति । धनात् धर्मः ततः सुखम् आप्नोति ।

वृक्षो ददाति पुष्पाणि शाकं सस्यं फलानि तु ।
प्राणवायुं (अम्लजानं) च छायां वै कुरु वृक्षस्य रोपणम् ।।४।।

अर्थः- वृक्षः पुष्पाणि शाकं सस्यं फलानि प्राणवायुं (अम्लजानं) छायां च ददाति । अतः वृक्षस्य रोपणं कुरु ।

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ।।५।।

अर्थः-अयं निजः परः वा इति लघुचेतसां गणना भवति । किन्तु उदारचरितानां वसुधा एव कुटुम्बकम् इति गणना भवति ।

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ।।६।।

अर्थः दानं हस्तस्य भूषणम्। सत्यं कण्ठस्य भूषणम्। शास्त्रं- श्रोत्रस्य भूषणम्। अतः भूषणैः किं वा प्रयोजनम्।

**ଶବ୍ଦାର୍ଥ :** ଶତ୍ରୁଃ-କ୍ଷତିକାରକ, ବୈରୀ-ବିରୋଧୀ, ନପାଠିତଃ-ପଢ଼ାଯାଇନାହିଁ, ଶୋଭତେ-ଶୋଭାପାଏ, ମୌନିନଃ-ମୌନଥିବାଲୋକର, ପାତ୍ରତାମ୍-ଯୋଗ୍ୟତା, ଆପ୍ନୋତି-ପ୍ରାପ୍ତହୁଏ, ଗଣନା-ବିଚାର, ଲଘୁଚେତସାମ୍-ନୀଚମନାମାନଙ୍କର, କୁଟୁମ୍ବକମ୍-ପରିବାର, ଶ୍ରୋତ୍ରସ୍ୟ-କାନର

## अभ्यासः (ଅଭ୍ୟାସ)

### १.शून्यस्थानं पूरयतु। (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣକର)

(क) येन ________ न पाठितः। (बालः, बाला)

(ख) जपतो ________ पातकम्। (नास्ति, अस्ति)

(ग) विनयात् ________ पात्रताम्। (याति, यान्ति)

(घ) कुरु ________ रोपणम्। (वृक्षस्य, वृक्षम्)

(ङ) हस्तस्य भूषणं ________ । (सत्यं, दानम्)

### २.मातृभाषया अर्थं लिखतु। (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

(क) भूषणैः किं प्रयोजनम्।

(ख) मौनिनः कलहः नास्ति।

(ग) वसुधैव कुटुम्बकम्।

(घ) वृक्षो ददाति पुष्पाणि।

(ङ) येन बालो न पाठितः

### ३.संस्कृतेन लिखतु (ସଂସ୍କୃତରେ ଲେଖ)

ପାପନଥାଏ, ଶୋଭାପାଏନାହିଁ, ଗଛପ୍ରାଣବାୟୁ ଦିଏ, କଣ୍ଠର ଭୂଷଣ ସତ୍ୟ, ବିନୟରୁ ଯୋଗ୍ୟତା ଜାତ ହୁଏ ।

### ४.स्तम्भमेलनं करोतु। (ସ୍ତମ୍ଭମେଳନ କର)

| (क) | (ख) |
|---|---|
| ततः | ददाति |
| विद्या | भूषणम् |
| हस्तस्य | सुखम् |
| परो | आप्नोति |
| धनम् | वेति |

# रक्ष रक्ष काननम्



रक्ष रक्ष काननं
वृक्षराशि - शोभनम्।
काले वृष्टि - कारकम्
शुद्धवायुदायकम् ॥१॥

रोगवारणोचिता
मूलिका वने स्थिता।
सम्पदां हि सम्पदं
काननं विचिन्तय ॥२॥

काननं हि जीवनं
रक्ष रक्ष तद् धनम्।
काननस्य नाशनं
स्वस्य विद्धि नाशनम् ॥३॥

काननस्य वर्धने
निरतः सत्यरक्षणे।
त्वं भविष्यचिन्तने
युक्तमानसो भव ॥४॥

**शब्दार्थाः** - राशिः - समूहः, काले - उपयुक्तसमये, रोगवारण - रोगनिवारक, रोगवारणोचिता - रोगवारण + उचिता, विद्धि - अवगच्छतु

# अभ्यासः (ଅଭ୍ୟାସ)

१. **शून्यस्थानं पूरयतु (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣକର ।)**

(क) _______ हि जीवनम्। (काननः, काननम्)

(ख) युक्तमानसो _______ । (भव, भवतः)

(ग) रक्ष रक्ष _______ धनम्। (सः, तत्)

(घ) मूलिका _______ स्थिता। (ग्रामे, वने)

(ङ) _______ वृष्टिकारकम्। (काले, कालः)

२. **मातृभाषया अर्थं लिखतु (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)**

काले, वृष्टिः, काननस्य, भव, निरतः

३. **संस्कृतेन लिखतु (ସଂସ୍କୃତରେ ଲେଖ)**

ଜଙ୍ଗଲ ରକ୍ଷାକର, ସେହି ଧନ ରକ୍ଷାକର, ଜଙ୍ଗଲହିଁ ଜୀବନ, ଯୁକ୍ତ ମାନସ ହୁଅ, ଜଙ୍ଗଲର ବିନାଶ ନିଜର ବିନାଶ ।

४. **स्तम्भमेलनं करोतु (ସ୍ତମ୍ଭ ମିଳାଅ)**

| (क) | (ख) |
|---|---|
| तत् | भव |
| रक्ष | नाशनम् |
| त्वं | धनम् |
| स्वस्य | जीवनम् |
| काननं | काननम् |

# उपदेशः



प्रत्युषकाले उत्तिष्ठतु
स्वकीयकर्म विदधातु
अल्पमाहारं स्वीकरोतु
गृहपठनम् आचरतु ॥

विद्यामन्दिरम् आगच्छतु
तत्र नियमान् पालयतु ।
शृणोतु पठतु लिखतु
क्रीडतु सत्यं कथयतु ॥

पौष्टिकं भोजनं खादतु
विशुद्धं पानीयं पिबतु ।
हितोपदेशं पालयतु
परोपकारं साधयतु ॥

आलस्यभावं वर्जयतु
माता पितरौ तोषयतु
देशसेवकान् पूजयतु
समाजे आदरमाप्नोतु ॥

देशगौरवं बोधयतु
अनुजान् नित्यं मोदयतु
गुरुजनान् सम्मानयतु
विश्वबन्धुत्वं स्थापयतु ॥

(गीतं सस्वरं गायतु)

## अभ्यासः (ଅଭ୍ୟାସ)

१. शून्यस्थानं पूरयतु (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣକର ।)

(क) पौष्टिकं ________ खादतु। (भोजनम्, भोजनः)

(ख) परोपकारं ________। (साधयतु, साधय)

(ग) ________ आदरम् आप्नोतु। (समाजः, समाजे)

(घ) ________ सम्मानयतु। (गुरुजनाः, गुरुजनान्)

(ङ) विशुद्धं ________ पिबतु। (भोजनम्, पानीयम्)

२. मातृभाषया अर्थं लिखतु (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

आचरतु, पालयतु, लिखतु, खादतु, पिबतु, स्थापयतु।

३. संस्कृतेन लिखतु (ସଂସ୍କୃତରେ ଲେଖ)

ସମାଜରେ, ନିଜକାମ, ନିୟମ ଗୁଡ଼ିକୁ, ସାଧନକରନ୍ତୁ, ବୁଝାନ୍ତୁ ।

४. स्तम्भमेलनं करोतु (ସ୍ତମ୍ଭ ମିଳାଅ)

| (क) | (ख) |
|---|---|
| पौष्टिकं | पिबतु |
| पानीयं | पितरौ |
| माता | मोदयतु |
| नित्यं | पालयतु |
| हितोपदेशं | भोजनम् |

●●●